णादिचालनं यत्तत्रातिदिशति। बालकस्य यद्यपि करचरणादिचालनं प्रयत्नपूर्व्वकमेव तथापि हिताहितप्राप्तिफलकं न भवति न पुण्यपापहेतुकमित्यतिदेशार्थः ११॥ इदानीं प्रयत्नपूर्व्वकेऽपि कर्म्माणि यत्र पुण्यपापहेतुकत्वं तत्र दारककर्म्मतुल्यतामतिदिशन्नाह। आततायिना केनाप्यगारे दाह्यमाने तत्र दग्धस्य पुरुषस्य विस्फोटे वह्निकृते जाते सति तस्याततायिनो बधानुकूलेन प्रयत्नेन हस्तादौ यत्कर्म्म जनितं तन्न पुण्यहेतुकं न वा पापहेतुकं यथाहुः। “नाततायिबधे दोषो हन्तुर्भवति कश्चन। प्रकाशं वाऽप्रकाशं वा मन्युस्तन्मन्युमृच्छति”। “अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहारी च षड़ेते आततायिनः” १२। इदानीं यत्नं विना यानि कर्म्माणि भवन्ति तान्याह। प्रसुप्तस्येति चैतन्याभावदशामुपलक्षयति तेन मूर्च्छितस्य जीवतोऽचैतन्येऽपि वायुकृतं चलनं द्रष्टव्यमत्र १३॥ शरीरकर्म्माणि व्याख्याय तदितराण्याह। तृणपदेन वृक्षगुल्मलतावतानादिकं सर्व्वमुपलक्षयति १४। अदृष्टाधीनं कर्म परिगणयन्नाह। मणिपदेन कांस्यादिकमुपलक्षयति तेनाभिमन्त्रितं मणिकांस्यादि तस्कराभिमुखं यद् गच्छति तत्र गमने मण्यादि समवायिकारणम्, अदृष्टवत्तस्करात्ममणिसंयोगोऽवसमवायिकारणम्, तस्करस्य पापं निमित्तकारणम्। सूच्यभिसर्पणमिति सूचीपदेन लौहमात्रं तृणञ्चोपलक्षयति तथा चायस्कान्ताभिमुखं यत् सूच्यादेर्गमनं तृणकान्ताभिमुखं यत् तृणस्य गमनं तत्र सूच्यादि समवायिकारणम्, यस्य हितमहितं वा तेन तृणसूच्यादिगमनेन तददृष्टवदात्मसंयोगोऽसमवायिकारणम्, तददृष्टमेव निमित्तकारणम्, एवमन्यदप्यूह्यम्। तद्यथा वह्नेरूर्द्ध्वज्वलनं वायोस्तिर्य्यग्गमनं सर्गादौ परमाणुकर्म्मादि १५। ननु शरविहङ्गमालातचक्रादीनामुपरमपर्य्यन्तमेकमेव कर्म्म नाना वेति संशये निर्णयहेतुमाह। इषाविति षष्ठ्यर्थे सप्तमी, इदमत्राकूतं वेगेन गच्छतां शरादीनां कुड्यादिसंयोगानन्तरं शरादौ सत्येव गत्युपरमो दृश्यते अत्राश्रयनाशस्तावन्न तन्नाशकः आश्रयस्य विद्यमानत्वात् विरोधिगुणान्तरञ्च नोपलभ्यते तेन स्वजन्यः संयोग एव कर्म्मनाशक इत्युन्नीयते स च संयोगश्चतुर्थक्षणे जातः पञ्चमक्षणे कर्म्म नाशयति। तथा हि कर्म्मोत्पत्तिरथ विभागः अथ पूर्व्वसंयोगनाशः उत्तरसंयोगः कर्म्मनाशः तेनायुगपत्संयोगविशेषाः कर्म्मनानात्वज्ञापका इत्यर्थः संयोगविशेषा इति संयोगे विशेषः स्वजन्यत्वमेव अन्यथा संयोगमात्रस्य कर्मनाशकत्वे कर्म्म क्वचिदपि न तिष्ठेत् १६। नोदननिष्पाद्यकर्मप्रकरणानन्तरं संस्कारनिष्पाद्यकर्मप्रकरणमारभते। पुरुषप्रयत्नेनाकृष्टया पतञ्चिकया नुन्नस्येषोराद्यं कर्म जायते तत्र नोदनमसमवायिकारणम्, इषुः समवायिकारणम्, प्रयत्नगुरुत्वे निमित्तकारणे, तेन चाद्येन कर्मणा समनाधिकरणो वेगाख्यः संस्कारो जन्यते न च वेगेन गच्छतीति प्रत्यक्षसिद्ध एव तेन संस्कारेण तत्रेषौ कर्म्म जायते तत्रासमवायिकारणं संस्कारः, समवायिकारणमिषुः, निमित्तकारणन्तु तीव्रो नोदनविशेषः, एवञ्च यावदिषुपतनमनुवर्त्तमानेन संस्कारेण उत्तरोत्तरः कर्मसन्तानो जायते स्वजन्योत्तरसंयोगेन कर्मणि नष्टे संस्कारेण कर्मान्तरजननात् एक एव संस्कारः कर्मसन्तानजनकः न तु कर्मसन्तानवत् संस्कारसन्तानोऽप्यभ्युपगन्तुमुचितो गौरवादिति दर्शयितुमाह तथोत्तरमुत्तरञ्चेति तत्कर्मकारिताच्च संस्कारादित्येकवचनञ्च, न्यायनये तु कर्मसन्तानवत् संस्कारसन्तानस्वीकारे गौरवम्, यत्तु युगपत्प्रक्षिप्तशरयोरेकस्य तीव्रो वेगोऽपरस्य तु मन्दस्तत्र नोदनतीव्रत्वमन्दत्वे निमित्तम् १७। ननु संस्कार एक एव चेत् कर्मसन्ताजनकस्तदा कदाचिदपि शरपातो न स्यात् कर्मजनकस्य संस्कारस्य सत्त्वादित्यत आह। गुरुत्वन्तावत् पतनकारणमनुवर्त्तमानमेव तच्च गुरुत्वं संस्कारेण प्रतिरुद्धं पतनं नाजीजनत् अथ प्रतिबन्धकाभावे तदेव गुरुत्वं पतनं करोतीत्यर्थः” १८। उपस्कारः।

“नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म१। तद्विशेषेणादृष्टकारितम्२। अपां संयोगाभावे गुरुत्वात् पतनम्३। द्रवत्वात् स्यन्दनम्४। नाड्यो वायुसंयोगादारोहणम्५। नोदनापीड़नात् संयुक्तसंयोगाच्च६। वृक्षाभिसर्पणमित्यदृष्टकारितम्७। अपां संघातो विलयनञ्च तेजःसंयोगात्८। तत्र विस्फूर्ज्जथुर्लिङ्गम्९। वैदिकञ्च१०। अपां संयोगाद्विभागाच्च स्तनयित्नोः११। पृथिवीकर्मणा तेजःकर्म वायुकर्म च व्याख्यातम्१२। अग्नेरूर्द्ध्वज्वलनं वायोस्तिर्य्यक्पवनमणूनां मनसश्चाद्यं कर्मादृष्टकारितम्१३। हस्तकर्मणा मनसः कर्म व्याख्यातम्१४। आत्मेन्द्रिमनोऽर्थसन्निकर्षात् सुखदुःखे१५। तदनारम्भ आत्मस्थे मनसि शरीरस्य दुःखाभावः स योगः १६। अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्य्यान्तरसंयोगाश्चेत्यदृष्टकारितानि” १७। वै० सू०। नोदनादिनिष्पाद्यकर्मपरीक्षाप्रकरणम् तत्राह। नोदनं संयोगविशेषः येन संयोगेन जनितं कर्म संयोगिनोः परस्परं विभागहेतु